## आच्छीनद्योर्नुम् । (८०/४४८)

[1]अवर्णान्तादङ्गादुत्तरस्य शतुः वा नुमागमो भवति शीनद्योः परतः । तुदती कुले, तुदन्ती कुले । तुदती ब्राह्मणी, तुदन्ती ब्राह्मणी । याती कुले, यान्ती कुले । याती ब्राह्मणी, यान्ती ब्राह्मणी । करिष्यती कुले, करिष्यन्ती कुले । करिष्यती ब्राह्मणी, करिष्यन्ती ब्राह्मणी । [2]अत्रान्तरङ्गत्वादेकादेशे कृते व्यपवर्गाभावात् अवर्णान्तादङ्गादुत्तरस्य शतुः इति न युज्यते वक्तुम्, 'उभयत आश्रये नान्तादिवत्' (व्या.प. ५१) इत्यन्तादिवद्भावोऽपि नास्ति, भूतपूर्वगत्याश्रयणे वा अदती, घ्नती इत्येवमादिषु अतिप्रसङ्गः इति ? अत्र समाधिं केचिदाहुः । शतुरवयवे शतृशब्दो वर्तते, अवर्णान्तादङ्गादुत्तरो यः शत्रवयवः इति[3] । अपरे [4]पुनराहुः । आत् इत्यनेन [5]शीनद्यावेव विशेष्येते । अवर्णान्तादङ्गादुत्तरे ये शीनद्यौ तयोः[6] परतः शत्रन्तस्य नुम् भवति इति । तत्र येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् इति [7]तकारेण एव व्यवधानमाश्रयिष्यते । आत् इति किम् ? कुर्वती[8] । सुन्वती । शीनद्योः इति किम् ? तुदताम् । नुदताम् ॥

## शप्श्यनोर्नित्यम् । (८१/४४६)

शप् श्यन् इत्येतयोः[9] शतुः शीनद्योः परतो नित्यं नुमागमो भवति । पचन्ती कुले । पचन्ती ब्राह्मणी[10] । दीव्यन्ती कुले । दीव्यन्ती ब्राह्मणी । सीव्यन्ती कुले । सीव्यन्ती ब्राह्मणी । नित्यग्रहणं वा इत्यस्याधिकारस्य निवृत्त्यर्थम् । [11]इहारम्भसामर्थ्या[12]न्नित्यमुत्तरत्र [13]विकल्प एवाशङ्क्येत ॥

## सावनडुहः । (८२/३३२)

सौ परतः [14]अनडुहोऽङ्गस्य नुमागमो भवति । अनड्वान् । हे अनड्वन् । अत्र केचित् आत् इत्यधिकारादाममोः कृतयोः नुमं कुर्वन्ति । तेन नुमा आममौ न बाध्येते, आमम्भ्यां च नुम् इति । अपरे तु सत्यपि [15]सामान्यविशेषत्वे आममोः नुमश्च समावेशमिच्छन्ति, न बाध्यबाधकभावम्, यथा चिचीषत्यादिषु दीर्घत्वद्विर्वचनयोः इति[16] ॥

## दृक्स्ववस्स्वतवसां छन्दसि । (८३/३८७७)

दृक् स्ववस् स्वतवस् इत्येतेषां सौ परतो नुमागमो भवति छन्दसि विषये । ईदृङ् । [17]तादृङ् । यादृङ् । [18]सदृङ् । स्ववान् । स्वतवान् पायुरग्ने ॥

## दिव औत् । (८४/३३६)

दिव् इत्येतस्य सौ परतः औत् इत्ययमादेशो भवति । द्यौः । दिव् इति प्रातिपदिकमस्ति निरनुबन्धकम् । धातुस्तु सानुबन्धकः, स इह न गृह्यते, अक्षद्यूः[19] ॥

---

1. वा इत्यनुवर्तते इत्यधिकम् क. 2. अत्र नास्ति क. 3. यथा ग्रामो दग्ध इति ग्रामैकदेशः निर्दिश्यते इत्यधिकम् ब. ड. 4. पुनरेवमाचक्षते ई. 5. शीनद्योरेव क. 6. शीनद्योः इत्यधिकम् इ. 7. इति एकेन वर्णेन इत्यधिकम् क, तकारेण शतृप्रत्ययेन व्यवधानमाश्रितम् ड. 8. ब्राह्मणी इत्यधिकम् क. 9. परतः इत्यधिकम् क. 10. यजन्ती कुले यजन्ती ब्राह्मणी श्यन् इत्यधिकम् ई. इ. ड. 11. इह तु क. 12. नित्यो विधिः । उत्तर॰ तदनुवर्तते एव इति आशङ्क्येत ई. ह. 13. अनुवृत्तिरेव क. 14. अनडुहः इत्येतस्याङ्गस्य क. 15. सामान्य- विशेषविषयत्वे ई. 16. जिज्ञास्यम् इत्यधिकम् क. 17. तादृङ नास्ति ड. 18. पुरुत्राहि सदृङ्ङसि ड. 19. इति इत्यधिकम् ई. ब. ड. इ.